Reg. No. : ....................................

Name : ..........................................

**FY-418**

**FIRST YEAR HIGHER SECONDARY EXAMINATION, MARCH 2023**

Part – III

**SANSKRIT SAHITYA**

Maximum : 80 Scores

Time : 2½ Hours

Cool-off time : 15 Minutes

*निर्देशा:*

- 15 निमेषाः समाश्वाससमयः ।
- प्रश्नान् पठितुम् इच्छानुसारं चयितुम्, उत्तराणि क्रमीकर्तुं च अयं समयः उपयोक्तव्यः ।
- प्रश्नस्य निर्देशान् सश्रद्धं पठित्वा अवगम्य च उत्तराणि लेखनीयानि ।
- प्रश्नानाम् अङ्काः तत्र तत्र दत्ताः ।
- उत्तरलेखनाय समयः अङ्काः च परिगणनीयः ।

*നിർദ്ദേശങ്ങൾ:*

- 15 മിനിറ്റ് സമാശ്വാസ സമയമാണ്. ഈ സമയം ചോദ്യങ്ങൾ വായിക്കുന്നതിനും ഇഷ്ടമുള്ള ചോദ്യങ്ങൾ തിരഞ്ഞെടുക്കുന്നതിനും ഉത്തരങ്ങൾ ആസൂത്രണം ചെയ്യാനും ഉപയോഗിക്കാം.
- ഓരോ ചോദ്യവുമായി ബന്ധപ്പെട്ട നിർദ്ദേശങ്ങൾ ശ്രദ്ധാപൂർവ്വം വായിച്ചു മനസിലാക്കിയ ശേഷം ഉത്തരമെഴുതുക.
- ഓരോ ചോദ്യത്തിനുമുള്ള സ്കോർ അതോടൊപ്പം നൽകിയിരിക്കുന്നു.
- ഉത്തരമെഴുതുമ്പോൾ സമയവും സ്കോറും പരിഗണിക്കണം.

**1-7 समुचितमुत्तरं कोष्ठकात् निर्धार्य लिखत । प्रतिप्रश्नं एकः अङ्कः ।**

**ശരിയായ ഉത്തരം ബ്രാക്കറ്റിൽ നിന്നും തിരഞ്ഞെടുത്ത് എഴുതുക. ഓരോ സ്കോർ വീതം.** **(7 × 1 = 7)**

1. सुबद्धमूलाः के निपतन्ति ?

   (विद्याः, आपगाः, पादपाः)

2. सीतादर्शनमिति पाठभागः रामायणस्य कस्मात् काण्डात् स्वीकृतः ?

   (बालकाण्डात्, सुन्दरकाण्डात्, युद्धकाण्डात्)

3. कुलशेखरः कस्य धर्मस्य प्रचारकः आसीत् ?

   (वैष्णव धर्मस्य, बुद्ध धर्मस्य, शैव धर्मस्य)

4. भासविरचितः ग्रन्थः कः ?

   (रघुवंशं, बालचरितम्, उत्तररामचरितम्)

5. भोजराजः कः ?

   (कृष्णः, प्रलम्बः, कंसः)

6. सामान्यविशेषयोः उक्तिः कस्मिन् अलङ्कारेऽन्तर्भवति ?

   (रूपके, अर्थान्तरन्यासे, उत्प्रेक्षायाम्)

7. वसन्ततिलका वृत्तस्य गणव्यवस्था का ?

   (त त ज गु गु, न भ भ र, त भ ज ज गु गु)

**8-11 यथानिर्देशम् उत्तरं लिखत । प्रत्येकम् अङ्कद्वयम् । त्रयाणां प्रश्नानामुत्तरं देयम् ।**

**നിർദ്ദേശാനുസാരം ഉത്തരം എഴുതുക. രണ്ട് സ്കോർ വീതം. മൂന്ന് ചോദ്യങ്ങളുടെ ഉത്തരം എഴുതുക.** **(3 × 2 = 6)**

8. पदच्छेदं लिखत ।

(क) पापान्निवारयति – पापात् + ________ ।

(ख) तथैव – तथा + ________ ।

9. एकपदं लिखत ।

(ग) मलिनेन संवीता । ताम् ।

(घ) पवनात् सम्भवः यस्य सः ।

10. प्रदत्तेषु शुद्धं वाक्यद्वयं चित्वा लिखत ।

(ङ) कः खे चरति ?

कः खे चरसि ?

(च) त्वं विद्यालयं गच्छति ।

त्वं विद्यालयं गच्छसि ।

11. सन्धत्त ।

(छ) मोहात् + वसुदेववाक्यम् ________ ।

(ज) तव + उचितम् ________ ।

**12-15 त्रयाणां प्रश्नानामुत्तरं लिखत । एकैकस्य प्रश्नस्य कृते अङ्कत्रयम् ।** **(3 × 3 = 9)**

**മൂന്ന് ചോദ്യങ്ങൾക്ക് ഉത്തരമെഴുതുക. മൂന്ന് സ്കോർ വീതം.**

12. अधः प्रदत्तस्य पद्यस्याशयं मातृभाषया आङ्गलभाषयाः वा अनुवदत ।

    शिक्षा क्षयं गच्छति कालपर्ययात्

    सुबद्धमूलाः निपतन्ति पादपाः ।

    जलं जलस्थानगतं च शुष्यति

    हुतं च दत्तं च तथैव तिष्ठति ।।

13. अधः प्रदत्ते वाक्ये क्त्वान्त-ल्यबन्त-तुमुन्नन्तानि चित्वा लिखत ।

    वसुदेवः कृष्णं कंसात् रक्षितुं तं हस्ते गृहीत्वा नन्दगोपहस्ते समर्प्य प्रत्यागच्छति ।

14. अधः प्रदत्तस्य पद्यस्यान्वयं पूरयत ।

    पद्यम् –

    एका भार्या प्रकृतिचपला निश्चला च द्वितीया

    पुत्रोऽनङ्गः त्रिभुवनजयी मन्मथो दुर्निवारः ।

    शेषः शय्या वसतिरुदधिर्वाहनं पन्नगारिः

    स्मारं स्मारं स्वगृहचरितं दारुभूतो मुरारिः ।।

    एका भार्या प्रकृतिचपला, द्वितीया ________ च । पुत्रः ________ मन्मथः त्रिभुवनजयी दुर्निवारः च । शेषः ________ उदधिः वसतिः । पन्नगारिः वाहनम् । एवं स्वगृहचरितं स्मारं ________ मुरारिः दारुभूतः ।

15. अधः प्रदत्तान् अलङ्कारान् लक्षणैः सह योजयत ।

| **अलङ्कारः** | **लक्षणम्** |
|---|---|
| उपमा | उपमानस्य उपमेयत्वम् । |
| अर्थान्तरन्यासः | यत्र सादृश्यलक्ष्मीरूल्लसति । |
| प्रतीपम् | सामान्यविशेषयोरूक्तिः । |

DITTO WS

**16 - 18 सर्वेषां प्रश्नानामुत्तरं लेखनीयम् । प्रतिप्रश्नम् चत्वारो अङ्का ।**

**16 – 18 എല്ലാ ചോദ്യങ്ങൾക്കും ഉത്തരമെഴുതുക. 4 സ്കോർ വീതം.** **(3 × 4 = 12)**

16. 'क' विभागे प्रदत्तानि वृत्तानि 'ख' विभागे प्रदत्तैः पद्यांशैः सह योजयत :

| **(क)** | **(ख)** |
|---|---|
| अनुष्टुभ् | शशिदिवाकरयो ग्रहपीडनम् । |
| द्रुतविलम्बितम् | वागर्थाविव संपृक्तौ । |
| | अर्थो हि कन्या परकीय एव । |

17. प्रदत्तां खण्डिकां पठत । अधोरेखाङ्कितपदानां स्थाने समानार्थकपदान्युपयुज्य खण्डिकां पूरयत ।

कस्मिंश्चिदधिष्ठाने चत्वारो ब्राह्मणपुत्राः मिथः मित्रभावमुपगताः वसन्ति स्म । तेषां त्रयः शास्त्रेषु पारङ्गताः प्रायोगिक बुद्धिरहिताश्च । परन्तु एकः बुद्धिमान् शास्त्रपराङ्मुखः ।

(शास्त्रविमुखः, किन्तु, सौहार्दमुपगताः द्विजपुत्राः)

18. अधः प्रदत्तस्याशयस्य सूचकं पद्यं चित्वा लिखत ।

"सीतां दृष्ट्वा सन्तुष्टः हनूमान् मनसा रामं जगाम । तं प्रभुं प्रशशंस च ।

(क) दुःखेन बुबुधे सीतां हनूमाननलङ्कृताम् ।

संस्कारेण यथाहीनां वाचमर्थान्तरं गताम् ।।

(ख) एवं सीतां तथा दृष्ट्वा हृष्टः पवनसम्भवः ।

जगाम मनसा रामं प्रशशंस च तं प्रभुम् ।।

(ग) हनूमानपि विक्रान्तः सर्वं शुश्राव तत्वतः ।

सीतायास्त्रिजटायाश्च राक्षसीनां च तर्जनम् ।।

**19 - 23 चतुर्णां प्रश्नानामुत्तरं लिखत । प्रतिप्रश्नं पञ्च अङ्का ।** **(4 × 5 = 20)**

**19 – 23 നാല് ചോദ്യത്തിന് ഉത്തരം എഴുതുക. 5 സ്കോർ വീതം.**

19. प्रदत्तस्य पद्यस्य गद्यक्रमं पूरयत ।

एकदा रामचन्द्रस्य
लालयन्ती पदाम्बुजम् ।
झटित्युन्मुच्य चिक्षेप
सीता रत्नाङ्गुलीयकम् ।।

________ रामचन्द्रस्य ________ लालयन्ती ________ रत्नाङ्गुलीयकम् उन्मुच्य ________ ।

20. प्रदत्तं पद्यं व्याख्यात ।

ज्वलति चलितेन्धनोऽग्निः
विप्रकृतः पन्नगः फणां कुरुते ।
प्रायः स्वं महिमानं
कोपात् प्रतिपद्यते हि जन्तुः ।।

(**सूचना :** आशयम्, स्वारस्यम्)

21. प्रादेशिकभाषायाम् आङ्गलभाषायां वा अनुवदत ।

शिशुसाहित्ये तथा च प्रथमं स्थानमस्ति पञ्चतन्त्रकथायाः । आबालवृद्धं जनानामोदयन् ग्रन्थतल्लाजोऽयं साहित्यमातुः मकुटायमानो विराजते । पञ्चतन्त्रस्य भाषा सरला भवति । अतः एव सुगमा च भवति ।

22. **सूचना :** आधारीकृत्य डॉ. के.एन. एषुत्तच्छन् संस्कृतग्रन्थान्यधिकृत्य एकां टिप्पणीं लिखत ।

सूचना : डॉ. के.एन. एषुत्तच्छन् – आधुनिकः केरलीयः संस्कृतकविः – केरलोदयम् – केरलोत्पत्तेः परं चरित्रं वर्णयति । त्रिधा विभक्तम् स्वप्नमञ्जरी, इतिहासमञ्जरी, स्मृतिमञ्जरी च ।

DITTO WS

23. यथोचितं योजयत ।

| | | |
|---|---|---|
| कंसः | – | कृष्णस्य पिता । |
| भासः | – | कृष्णस्य मातुलः । |
| वसुदेवः | – | गोपानां नेता । |
| नन्दगोपः | – | कृष्णमाता । |
| देवकी | – | बालचरितस्य कर्ता । |

**24 - 27 सर्वे प्रश्नाः समाधेयाः । प्रतिप्रश्नं षट् अङ्काः ।**

**24 – 27 എല്ലാ ചോദ്യത്തിനും ഉത്തരമെഴുതുക. ആറ് സ്കോർ വീതം.** **(3 × 6 = 18)**

24. 'क' विभागे प्रदत्तानि पद्यांशानि 'ख' विभागे प्रदत्तैः आशयैः सह योजयत ।

| क | ख |
|---|---|
| स्थाने निषण्णानवदत् विनीतः | मम हृदयं मनः च कलङ्कितम् । |
| हता नृशंसेन सुताः भगिन्याः | सा बाला अमर्षं नियम्य मामवदत् । |
| नियम्य सा मातुलः इत्यमर्षं प्रसेदुषी मामवदच्च बाला | इन्द्रादयः मामभिमुखीकर्तुं न शक्ताः । |
| युद्धेषु देवाः पुरुहूतमुख्याः भग्नाः मया स्थातुमशक्नुवन्तः | मया सहोदर्याः पुत्राः हताः |
| मनोहरं यश्च बिभर्ति रूपं वधं सः बालोऽर्हति मत्सकाशात् | स्वस्थाने उपविष्टान् मन्त्रीन् एवमकथयत् । |
| तेनाविलं मे हृदयं यशोऽपि | यः मनोहरः बालः सः मत्सकाशात् वधार्हः । |

25. कथास्तम्भान् क्रमीकुरुत ।

- द्वौ शास्त्रपारङ्गतौ किन्तु प्रायोगिकविज्ञानरहितौ च ।
- प्रथमः अस्थीनि द्वितीयः चर्मरुधिरमांसं जीवंश्च अदात् ।
- पुनः लब्धजीवः सिंहः तौ जघान ।
- एकदा एकस्य मृतस्य सिहस्यास्थीनि अपश्यन्
- एकः बुद्धिमान् शास्त्रपराङ्मुखः ।
- त्रयः ब्राह्मणपुत्राः मित्रत्वेन वसन्ति स्म ।

26. **सूचनाः आधारीकृत्य कुलशेखरस्य जीवनचरित्र रूपरेखां रचयत ।**

कालः – क्रिस्तोः परम् अष्टमे शतके – चेरराजस्य अधिपः – वैष्णवधर्म प्रचारकः – रूपकद्वयम् सुभद्राधनञ्जयम् – तपतीसंवरणम् – स्तोत्रकाव्यम् मुकुन्दमाल ।

27. प्रदत्तं गद्यभागं पठित्वा प्रश्नानामुत्तराणि लिखत ।

वसुदेवः स्वपुत्रं कृष्णं कंसात् त्रातुं मथुरायाः बहिरागच्छति । सः यदृच्छया मार्गे श्मशाने आगतं नन्दगोपं पश्यति । पुत्रं तस्य हस्ते समर्पयति । मृतामिति मत्वा नन्दगोपेनोपेक्षितां बालिकां जीवन्तीं विज्ञाय वसुदेवः तां स्वीकरोति । ततस्तां देवकीसमीपं नयति ।

(1) कृष्णं कस्मात् त्रातुमिच्छति ?

(2) तदर्थं सः कस्य नगरस्य बहिरागच्छति ?

(3) सः श्मशाने आगतं कं पश्यति ?

(4) सः पुत्रं कस्य हस्ते समर्पयति ?

(5) केन उपेक्षितां बालिकां जीवन्तीं ज्ञात्वा वसुदेवः स्वीकरोति ?

(6) सः बालिकां कस्याः समीपं नयति ?

**28 - 29 द्वयोः एकस्य उत्तरं लिखत । अष्ट अङ्काः ।**

**28 – 29 തന്നിരിക്കുന്നവയിൽ ഒരെണ്ണത്തിന്റെ ഉത്തരം എഴുതുക. എട്ട് സ്കോർ.**

**(1 × 8 = 8)**

28. सीताहनूमत्संवादः प्रदत्तानां सूचनानां साहाय्येन विशदयत ।

सीता दीना – राक्षसीभिः तर्जिता – हनूमान् पश्यति – रामस्य चरितकथनम् – सीतायाः आश्चर्यः – प्रत्यक्षमायाति – रामस्य कुशलप्रस्तावः – अङ्गुलीयकदानम् – सीतायाः प्रतिवचनम् ।

29. अधोदत्तानां सूचनानां साहाय्येन कंसस्य अमात्यानां च मिथः प्रवृत्तं सम्भाषणं विशदयत ।

मन्त्रीन् आह्वयति – घटनाकथनम् – देव्याः उक्तिं न्यवेदयति – कृष्णस्य लक्षण प्रस्तावः – कृष्णवधाय नियोगः ।